"अनिलस्य शिवा भार्य्या यस्याः पुत्त्रो मनो-
जवः ॥")
रुद्रस्य पुत्त्रभेदः। यथा, मार्कण्डेये। ५२। ११।
"ग्रनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः ॥"
तीर्थभेदः। यथा, महाभारते। ३। ८३। ८५।
"मनोजवे नरः स्नात्वा गोसहस्रफलं लभेत् ॥"
षष्ठमन्वन्तरस्येन्द्रः। यथा, मार्कण्डेये। ७६।५३।
"मनोजवस्तथैवेन्द्रः संख्यातो यज्ञभागभुक् ॥"
मेधातिथेः पुत्त्रभेदः। यथा, भागवते।५।२०।
२५। "तस्य प्रियव्रत एवाधिपतिर्नाम्ना मेधा-
तिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्त्रनामानि
तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रा-
नीकचित्ररेफविश्वाधारसंज्ञान् निधाप्याधि-
पतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपो-
वनं प्रविवेश ॥")

मनोजवः, त्रि, (मनो जवं वेगवद्यस्मिन्। यद्वा,
मनो जवति पितायमिति कृत्वा धावत्यस्मिन्
इति। जु सौत्रधातुः + अच्।) पितृतुल्यः। तत्प-
र्य्यायः। पितृसन्निभः १। इत्यमरः। ३।१।१३॥
अतिशयवेगवान्। (यथा, मार्कण्डेये।२१।८।
"तमन्वधावद्वेगेन तुरगेः णौ मनोजवः ॥")

मनोजवसः, त्रि, (मनो जवत्यस्मिन्। जु + बाहुल-
कात् असच्।) पितृसन्निभः। इत्यमरटीकायां
स्वामी। ३।१।१३॥

मनोजवा, स्त्री, (मनो जवत्यनेति। जु + अच्
टाप्।) अग्निजिह्वाङ्गनः। इति जटाधरः॥
(शुणादिविवृतिरत्र अग्निजिह्वाशब्दे ज्ञातव्या॥
वह्निजिह्वाविशेषः। यथा, मार्कण्डेये। ६६।५४।
"मनोजवा च यत्र जिह्वा लघिमा गुणलक्षणा।
तया नः पाहि पापेभ्य ऐहिकाच्च महा-
भयात् ॥"
[redacted] मातृगणभेदः। यथा, महाभारते।
९।४६।१६।
"मनोजवा कराटकिनी प्रघसा पूतना तथा ॥"
क्रौञ्चद्वीपस्य नदीविशेषः। यथा, मात्स्ये।
१२१। ८७।
"गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ॥"
मन इव जवो यस्याः। वेगविशिष्टायां स्त्रियाम्।
यथा, महाभारते। १। १५६। १८।
"अहःसु विहरानेन यथाकामं मनोजवा ॥")

मनोजवृद्धिः, पुं, (मनोजस्य कामस्य वृद्धिर्यस्मात्।)
कामवृद्धिक्षुपः। इति राजनिर्घण्टः॥

मनोज्ञं, क्ली, (मनो जानाति ज्ञापयति तोषय-
तीति। अन्तर्भूतण्यर्थे ज्ञा + कः।) सरल-
काष्ठम्। इति रत्नमाला॥

मनोज्ञं, त्रि, (मनसा जानातीति। ज्ञा + कः।
यद्वा, मनः ज्ञापयति तोषयतीति। अन्त-
र्भूतण्यर्थज्ञाधातोः कः।) मनोहरम्। तत्प-
र्य्यायः। सुन्दरम् २ रुचिरम् ३ चारु ४
सुषमम् ५ साधु ६ शोभनम् ७ कान्तम् ८
मनोरमम् ९ रुच्यम् १० मञ्जु ११ मञ्जुलम् १२।
इत्यमरः। ३। १। ५२॥ मनोहरम् १३ बन्धु-
रम् १४ वन्धूरम् १५ पेशलम् १६ पेषलम् १७
सुमनम् १८ वामम् १९ अभिरामम् २० नन्दि-
तम् २१। इति शब्दरत्नावली॥ (यथा,
सुश्रुते। १। ४६। अध्याये।
"मनोज्ञं शुचि नात्युष्णं प्रत्यग्रमशनं हितम्।
पूर्ब्बं मधुरमश्नीयात् मध्येऽम्ललवणौ रसौ ॥")

मनोज्ञा, स्त्री, (मनोज्ञ + स्त्रियां टाप्।) मनः-
शिला। इति रत्नमाला॥ (यथा, सुश्रुते
उत्तरतन्त्रे चयोदशाध्याये।
"स्विन्नं मनोज्ञाकासीसयोर्वाञ्जनकसैन्धवैः ॥")
राजपुत्त्री। इति जटाधरः॥ वन्ध्याकर्कोटकी।
आवर्त्तकी। स्थूलजीरकः। जाती। मदिरा।
इति राजनिर्घण्टः॥

मनोभवः, पुं, (मनसः मनसि वा भवतीति।
भू + अच्। मनसः भव उत्पत्तिर्यस्येति वा।)
कन्दर्पः। इति हलायुधः॥ (यथा, मार्कण्डेये।
१८। ४१।
"ते तां दृष्ट्वाग्रतो दैत्याः साभिलाषा मनोभवम्।
न शेकुरुद्धतं धैर्य्यान्मनसा वोढुमातुराः ॥"
मनोजन्ये, त्रि। यथा, भागवते। ६। १५।२४।
"दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः।
कर्म्मभिर्ध्यायतो नाना कर्म्माणि मनसोऽभ-
वन् ॥")

मनोभूः, पुं, (मनसः मनसि वा भवतीति। भू +
क्विप्।) कामदेवः। इति शब्दरत्नावली॥
(यथा, कलाविलासे। १। ३३।
"श्यामा शुशुभे शशिना तया मनोभूर्मधूत्सव-
स्तेन।
मदमुदितमानसानां तेनापि न्यगोदृशां
लीला ॥")

मनोयोनिः, पुं, (मन एव योनिरुत्पत्तिस्थान-
मस्य।) कामदेवः। इति हेमचन्द्रः।२।१४२॥

मनोरथः, पुं, (मनसः रथ इव। मन एव रथो-
ऽत्रेति वा) इच्छा। इत्यमरः। १। ७।२७॥
(यथा, रघौ। ११। ५९।
"इतस्ततश्च वैदेहीमन्वेष्टुं भर्त्तृचोदिताः।
कपयश्चेरुरार्त्तस्य रामस्येव मनोरथाः ॥"
कविविशेषः। यथा, राजतरङ्गिण्याम्।४।५९६।
"मनोरथः शङ्खदत्तश्चटकः सन्धिमांस्तथा।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥")

मनोरमं, त्रि, (मनो रमयतीति। रम् + णिच् +
अण्।) मनोज्ञम्। इत्यमरः। ३। १। ५२॥
(यथा, सुश्रुते। १। ४६। अध्याये॥
"पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥")

मनोरमा, स्त्री, (मनोरम + स्त्रियां टाप्।)
गोरोचना। इति राजनिर्घण्टः॥ बुद्धशक्ति-
विशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३
ओङ्कारा ४ स्वाहा ५ श्रीः ६ तारिणी ७
जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा
११ खद्दूरवासिनी १२ भद्रा १३ वैश्या १४ नील-
सरस्वती १५ शङ्खिनी १६ महातारा १७
वसुधारा १८ धनन्ददा १९ त्रिलोचना २०
लोचना २१। इति त्रिकाण्डशेषः॥ (इन्दी-
वराख्यविद्याधरस्य कन्या। यथा च मार्क-
ण्डेये। ६२। १३।
"अहमिन्दीवराख्यस्य सुता विद्याधरस्य वै।
नाम्ना मनोरमा जाता सुतायां मरुधन्वनः ॥"
सप्तसरस्वतीनामेकतमा। यथा, महाभारते।
९। ३८। ४।
"सुप्रभा काञ्चनाक्षी च विशाला च मनोरमा।
सरस्वती चौघवती सुरेणुर्विमलोदका ॥"
तथा च तत्रैव। ९। ३८। २४—२५।
"उद्दालकेन यजता पूर्ब्बं ध्यात्वा सरस्वती।
आजगाम सरिच्छ्रेष्ठा तं देशमृषिकारणात् ॥
पूज्यमाना मुनिगणैर्वल्कलाजिनसंवृतैः।
मनोरमेति विख्याता सा हि तैर्मनसाकृता ॥"
छन्दोविशेषः। तल्लक्षणमुदाहरणञ्च यथा,
छन्दोमञ्जर्य्याम्।
"नरजगैर्भवेन्मनोरमा।"
"तरणिजातटे विहारिणी व्रजविलासिनी
विलासतः।
सुररिपोस्तनुः पुनातु वः सुकृतशालिनां मनो-
रमा ॥")

मनोहतः, त्रि, (मनसा मनसि वा हतः।) प्रति-
हतः। इत्यमरः। ३। १। ४१॥

मनोहरं, त्रि, (हरतीति। हृ + अच्। मनसो
हरमिति।) मनोज्ञम्। इति शब्दरत्नावली॥
(यथा, मनौ। २। ३३।
"स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम् ॥"
यथा च मार्कण्डेये। ११२। ३।
"स ददर्श तदा तत्र होमधेनुं मनोहराम् ॥")
कुन्दवृक्षे, पुं। सुवर्णे, क्ली। इति राजनिर्घण्टः॥

मनोहरा, स्त्री, (मनोहर + टाप्।) जाती।
स्वर्णयूथी। इति राजनिर्घण्टः॥ (धरस्य वसोः
पत्नी। यथा, विष्णुपुराणे। १। १५। ११४।
"मनोहरायाः शिशिरः प्राणोऽथ वरुणस्तथा ॥"
अप्सरोविशेषः। यथा, महाभारते।१३।१९।४५।
"मनोहरा सुकेशी च सुमुखी हासिनी प्रभा ॥")

मनोहर्त्ता, [ र्त्तृ ] त्रि, (मनो हरतीति। हृ +
तृच्।) मनोहरणकर्त्ता। यथा,—
"यसनं तेऽपनेष्यामि त्रिलोक्यां यदि भाव्यते।
तमानेष्ये वरं यस्ते मनोहर्त्ता तमादिश ॥"
इति श्रीभागवते १० स्कन्धे ६२ अध्यायः॥

मनोहारि, [ न् ] त्रि, (मनो हरति मनो हर्त्तुं
शीलमस्येति वा। हृ + णिनिः।) मनोहरम्।
इत्यमरटीकायां स्वामी। तथाहि।
"गाङ्गं वारि मनोहारि मुरारिचरणच्युतम्।
त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥"
इति वाल्मीकिकृतगङ्गास्तोत्रम्॥

मनोह्वा, स्त्री, (मनः ह्वयति आह्वयतीवेति।
ह्वे + "आतोऽनुपसर्गे कः।"३।२।३। इति कः।
टाप्।) मनःशिला। इत्यमरः। २। ९। १०८॥
( अस्याः पर्य्यायो यथा,—